श्री काळी स्तुतिः (ब्रह्म कृतं)

श्री काळी स्तुतिः (ब्रह्म कृतं)

नमामि कृष्णरूपिणीं कृष्णांगयष्टिधारिणीं |
समग्रतत्त्वसागरं अपारपारगह्वरां || 1 ||

शिवाप्रभां समुज्ज्वलां स्फुरच्छशांकशेखरां |
ललाटरत्नभास्करां जगत्प्रदीप्तिभास्करां || 2 ||

महेंद्रकश्यपार्चितां सनत्कुमारसंस्तुतां |
सुरासुरेंद्रवंदितां यथार्थनिर्मलाद्भुतां || 3 ||

अतर्क्यरोचिरूर्जितां विकारदोषवर्जितां |
मुमुक्षुभिर्विचिंतितां विशेषतत्त्वसूचितां || 4 ||

मृतास्थिनिर्मितस्रजां मृगेंद्रवाहनाग्रजां |
सुशुद्धतत्त्वतोषणां त्रिवेदपारभूषणां || 5 ||

भुजंगहारहारिणीं कपालखंडधारिणीं |
सुधार्मिकौपकारिणीं सुरेंद्रवैरिघातिनीं || 6 ||

कुठारपाशचापिनीं कृतांतकामभेदिनीं |
शुभां कपालमालिनीं सुवर्णकल्पशाखिनीं || 7 ||

श्मशानभूमिवासिनीं द्विजेंद्रमौळिभाविनीं |
तमोऽंधकारयामिनीं शिवस्वभावकामिनीं || 8 ||

सहस्रसूर्यराजिकां धनंजयोग्रकारिकां |
सुशुद्धकालकंदलां सुभृंगबृंदमंजुलां || 9 ||

प्रजायिनीं प्रजावतीं नमामि मातरं सतीं |
स्वकर्मकारणे गतिं हरप्रियां च पार्वतीं || 10 ||

अनंतशक्तिकांतिदां यशोऽर्थभुक्तिमुक्तिदां |
पुनः पुनर्जगद्धितां नमाम्यहं सुरार्चितां || 11 ||

जयेश्वरि त्रिलोचने प्रसीद देवि पाहि मां |
जयंति ते स्तुवंति ये शुभं लभंत्यमोक्षतः || 12 ||

सदैव ते हतद्विषः परं भवंति सज्जुषः |
जराः परे शिवेऽधुना प्रसाधि मां करोमि किं || 13 ||

अतीव मोहितात्मनो वृथा विचेष्टितस्य मे |
कुरु प्रसादितं मनो यथास्मि जन्मभंजनः || 14 ||

तथा भवंतु तावका यथैव घोषितालकाः |
इमां स्तुतिं ममेरितां पठंति काळिसाधकाः |
न ते पुनः सुदुस्तरे पतंति मोहगह्वरे || 15 ||

इति काळीरहस्ये ब्रह्म कृत श्री काळी स्तुतिः ||